শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে অযোধ্যাকাণ্ডে

# ॥ ষট্ত্রিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষটিত্রিংশঃ সর্গঃ ॥

## শ্রীরামেণ সহ সৈন্যং কোষং চ প্রেষযিতুং রাজ্ঞো দশরথস্যাদেশঃ কৈকেযীকর্তৃকস্তস্য ৱিরোধঃ সিদ্ধার্থেন কৈকেয্যাঃ প্রবোধনং রাজ্ঞা স্ৱযমপি শ্রীরামেণ সহ ৱনং গন্তুমিচ্ছাযাঃ প্রকটনম্

ততঃ সুমন্ত্রমৈক্ষ্ৱাকঃ পীডিতোঽত্র প্রতিজ্ঞযা।
সবাষ্পমতিনিঃশ্ৱস্য জগাদেদং পুনর্ৱচঃ॥ **2.36.1** ॥

সূত রত্নসুসম্পূর্ণা চতুর্ৱিধবলা চমূঃ।
রাঘৱস্যানুযাত্রার্থং ক্ষিপ্রং প্রতিৱিধীযতাম্॥ **2.36.2** ॥

রূপাজীৱাশ্চ ৱাদিন্যো ৱণিজশ্চ মহাধনাঃ।
শোভযন্তু কুমারস্য ৱাহিনীঃ সুপ্রসারিতাঃ॥ **2.36.3** ॥

যে চৈনমুপজীৱন্তি রমতে যৈশ্চ ৱীর্যতঃ।
তেষাং বহুৱিধং দত্ত্বা তানপ্যত্র নিযোজয॥ **2.36.4** ॥

আযুধানি চ মুখ্যানি নাগরাঃ শকটানি চ।
অনুগচ্ছন্তু কাকুৎস্থং ৱ্যাধাশ্চারণ্যকোৱিদাঃ॥ **2.36.5** ॥

নিঘ্নন্ মৃগান্ কুঞ্জরাংশ্চ পিবংশ্চারণ্যকং মধু।
নদীশ্চ ৱিৱিধাঃ পশ্যন্ ন রাজ্যং সংস্মরিষ্যতি॥ **2.36.6** ॥

ধান্যকোশশ্চ যঃ কশ্চিদ্ ধনকোশশ্চ মামকঃ।
তৌ রামমনুগচ্ছেতাং ৱসন্তং নির্জনে ৱনে॥ **2.36.7** ॥

যজন্ পুণ্যেষু দেশেষু ৱিসৃজংশ্চাপ্তদক্ষিণাঃ।
ঋষিভিশ্চাপি সঙ্গম্য প্রৱৎস্যতি সুখং ৱনে॥ **2.36.8**॥

ভরতশ্চ মহাবাহুরযোধ্যাং পালযিষ্যতি।
সর্ৱকামৈঃ পুনঃ শ্রীমান্ রামঃ সংসাধ্যতামিতি॥ **2.36.9**॥

এৱং ব্রুৱতি কাকুৎস্থে কৈকেয্যা ভযমাগতম্।
মুখং চাপ্যগমচ্ছোষং স্বরশ্চাপি ন্যরুধ্যত॥ **2.36.10**॥

সা ৱিষণ্ণা চ সন্ত্রস্তা মুখেন পরিশুষ্যতা।
রাজানমেৱাভিমুখী কৈকেযী ৱাক্যমব্রৱীৎ॥ **2.36.11**॥

রাজ্যং গতধনং সাধো পীতমণ্ডাং সুরামিৱ।
নিরাস্বাদ্যতমং শূন্যং ভরতো নাভিপৎস্যতে॥ **2.36.12**॥

কৈকেয্যাং মুক্তলজ্জাযাং ৱদন্ত্যামতিদারুণম্।
রাজা দশরথো ৱাক্যমুৱাচাযতলোচনাম্॥ **2.36.13**॥

ৱহন্তং কিং তুদসি মাং নিযুজ্য ধুরি মাহিতে।
অনার্যে কৃত্যমারব্ধং কিং ন পূর্ৱমুপারুধঃ॥ **2.36.14**॥

তস্যৈতৎ ক্রোধসংযুক্তমুক্তং শ্রুৎৱা ৱরাঙ্গনা।
কৈকেযী দ্বিগুণং ক্রুদ্ধা রাজানমিদমব্রৱীৎ॥ **2.36.15**॥

তৱৈৱ ৱংশে সগরো জ্যেষ্ঠপুত্রমুপারুধৎ।
অসমঞ্জ ইতি খ্যাতং তথাযং গন্তুমর্হতি॥ **2.36.16**॥

এৱমুক্তো ধিগিত্যেৱ রাজা দশরথোঽব্রৱীৎ।
ৱ্রীডিতশ্চ জনঃ সর্ৱঃ সা চ তন্নাৱবুধ্যত॥ **2.36.17**॥

তত্র ৱৃদ্ধো মহামাত্রঃ সিদ্ধার্থো নাম নামতঃ।
শুচির্বহুমতো রাজ্ঞঃ কৈকেযীমিদমব্রৱীৎ॥ **2.36.18**॥

অসমঞ্জো গৃহীৎৱা তু ক্রীডতঃ পথি দারকান্।
সরয্ৱাং প্রক্ষিপন্নপ্সু রমতে তেন দুর্মতিঃ॥ **2.36.19** ॥

তং দৃষ্টৱা নাগরাঃ সর্ৱে ক্রুদ্ধা রাজানমব্রুৱন্।
অসমঞ্জং ৱৃণীষ্ৱৈকমস্মান্ ৱা রাষ্ট্রৱর্ধন॥ **2.36.20** ॥

তানুৱাচ ততো রাজা কিন্নিমিত্তমিদং ভযম্।
তাশ্চাপি রাজ্ঞা সম্পৃষ্টা ৱাক্যং প্রকৃতযোঽব্রুৱন্॥ **2.36.21** ॥

ক্রীডতস্ত্ৱেষ নঃ পুত্রান্ বালানুদ্ভ্রান্তচেতসঃ।
সরয্ৱাং প্রক্ষিপন্মৌর্খ্যাদতুলাং প্রীতিমশ্নুতে॥ **2.36.22** ॥

স তাসাং ৱচনং শ্রুৎৱা প্রকৃতীনাং নরাধিপঃ।
তং তত্যাজাহিতং পুত্রং তাসাং প্রিযচিকীর্ষযা॥ **2.36.23** ॥

তং যানং শীঘ্রমারোপ্য সভার্যং সপরিচ্ছদম্।
যাৱজ্জীৱং ৱিৱাস্যোঽযমিতি তানন্ৱশাৎ পিতা॥ **2.36.24** ॥

স ফালপিটকং গৃহ্য গিরিদুর্গাণ্যলোকযৎ।
দিশঃ সর্ৱাস্ত্ৱনুচরন্ স যথা পাপকর্মকৃৎ॥ **2.36.25** ॥

ইত্যেনমত্যজদ্ রাজা সগরো ৱৈ সুধার্মিকঃ।
রামঃ কিমকরোৎ পাপং যেনৈৱমুপরুধ্যতে॥ **2.36.26** ॥

নহি কঞ্চন পশ্যামো রাঘৱস্যাগুণং ৱযম্।
দুর্লভো হ্যস্য নিরযঃ শশাঙ্কস্যেৱ কল্মষম্॥ **2.36.27** ॥

অথৱা দেৱি ৎৱং কঞ্চিদ্ দোষং পশ্যসি রাঘৱে।
তমদ্য ব্রূহি তত্ত্বেন তদা রামো ৱিৱাস্যতে॥ **2.36.28** ॥

অদুষ্টস্য হি সন্ত্যাগঃ সৎপথে নিরতস্য চ।
নির্দহেদপি শক্রস্য দ্যুতিং ধর্মৱিরোধৱান্॥ **2.36.29** ॥

তদলং দেৱি রামস্য শ্রিযা ৱিহতযা ৎৱযা।
লোকতোঽপি হি তে রক্ষ্যঃ পরিৱাদঃ শুভাননে॥ **2.36.30** ॥

শ্রুৎৱা তু সিদ্ধার্থৱচো রাজা শ্রান্ততরস্ৱরঃ।
শোকোপহতযা ৱাচা কৈকেযীমিদমব্রৱীৎ॥ **2.36.31** ॥

এতদ্ৱচো নেচ্ছসি পাপরূপে
হিতং ন জানাসি মমাত্মনো ৱা।
আস্থায মার্গং কৃপণং কুচেষ্টা
চেষ্টা হি তে সাধুপথাদপেতা॥ **2.36.32** ॥

অনুব্রজিষ্যাম্যহমদ্য রামং
রাজ্যং পরিত্যজ্য সুখং ধনং চ।
সর্ৱে চ রাজ্ঞা ভরতেন চ ৎৱং
যথাসুখং ভুঙ্ক্ষ্ৱ চিরায রাজ্যম্॥ **2.36.33** ॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
অযোধ্যাকাণ্ডে ষটিত্রিংশঃ সর্গঃ ॥